जय माँ शारदे

उपशास्त्री-II साहित्य - तृतीय-पत्र

रघुवंश-महाकाव्यम्

Date ___/___/___

प्र०-(1) पद्यमिदम् व्याख्येयम् ?

सेयं स्वदेहार्पणनिष्क्रयेण न्याय्या मया मोचयितुं भवत्तः ।
न पारणा स्याद्विहता तवैवं भवेदलुप्तश्च मुनेः क्रियाऽर्थः ॥

उत्तरम्-प्रसंगः- प्रस्तुतोऽयं श्लोकः महाकवि कालिदासप्रणीतस्य रघुवंश-महाकाव्यस्य द्वितीय सर्गात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके राजा दिलीपः सिंहं प्रति कथयति - मृगेन्द्र! कामधेनुकल्पा एषा नन्दिनी आत्म कलेवरं तत्स्थाने समर्प्य त्वत्तो मोचनीया । इदमेव समुचितं स्यात् । तदेवं करणेन तव पारणा शिवानुशासनपालनम्, होमादिसाधनं गुरुगो-रक्षणञ्चैकपदे सम्पद्येत । अत एनां परित्यज, मां भक्षय ।

व्याख्या:- सा इयं = कामधेनुसदृशी नन्दिनी गौः, स्वदेहार्पणनिष्क्रयेण = निज-कायत्यागतुल्यमूल्यप्रदानेन, भवत: = त्वत्तः, मोचयितुं = त्याजयितुम्, न्याय्या = योग्या, एवम् = अनया रीत्या, तव = भवतः, पारणा = व्रतान्त भोजनम्, विहता = नाशिता, न स्यात् = नहि भवेत्, किञ्च मुनेः = ऋषेः वसिष्ठस्य, क्रियार्थश्च = यज्ञादिरूपोऽर्थश्च अलुप्तः = अनवरुद्धः, भवेत् = सम्पद्येत ।

Renu Devi
10/08/20

राधा उमाकान्त सं० महाविद्यालय सुरवसेना,
पूर्णिया ।

Page No. ____

शास्त्री-II साहित्य

मेघदूतम्

सूक्तिव्याख्याभागः

पूर्वमेघः

Date ___/___/___

Saathi

(1)- आशाबन्धः कुसुमसदृशं प्रायशोऽङ्गनानाम् ।
सद्यःपाति प्रणयि हृदयं विप्रयोगे रुणद्धि ॥

प्रसंग:- इयं सूक्ति महाकविकालिदासप्रणीतस्य मेघदूतस्य खण्डकाव्यस्य पूर्वमेघस्यास्ति । अत्र प्रतिविरहे नारीणां मानसिकदशां वर्णयन्नाह-

व्याख्या:- आशाबन्धः = विरहिण्याः पत्युः पुनर्मिलनतृष्णावृन्तम्, प्रणयि = स्नेहिलं, कुसुमसदृशं = सुमनतुल्यं पुष्पवदति सुकुमारं भवतीत्यर्थः । अत एव विप्रयोगे = पत्युःविरहकाले, सद्यःपाति = तत्क्षणपतिष्णु, अङ्गनानां = युवतीनां, हृदयम् = जीवनं, प्रायशः = प्रायेण रुणद्धि = प्रतिबध्नाति । पतिवियुक्ताः नार्यः पतिप्रत्यागमनाशयैव प्राणान्धारयन्तीत्यर्थः ।

(2)- कामार्ता: हि प्रकृतिकृपणाश्चेतनाऽचेतनेषु ॥

प्रसंग:- इयं सूक्तिः महाकविकालिदासप्रणीतस्य मेघदूतस्य खण्डकाव्यस्य पूर्वमेघस्यास्ति । अत्र कामार्तानामुचितानुचितविवेकशून्यत्वादचेतनं मेघं प्रति यक्षस्य याच्ञां वर्णयन्नाह- कामार्ता इति ।

व्याख्या- कामार्ताः = कामपीडिताः, चेतनाचेतनेषु = चैतन्यजडजगत्सु, प्रकृतिकृपणाः स्वभावतः दीनाः भवन्ति ।

सन्देशप्रेषणस्य चेतनेष्वेवोपयुक्तत्वात् यक्षेण मेघस्य नियोजनं तत्र कुतः कृतमिति शङ्कां निवारयन्नाह - कविः चेतनाचेतनेषु कामार्ताः प्रकृति कृपणाः भवन्ति तस्मादेव यक्षोऽत्र स्वसन्देशवाहने मेघं नियुक्तवानित्यर्थः ।

Renu Devi
10/08/20

रत्ना उमाकान्त सं० महावि० सुखसेना
पूर्णिया ।

Page No.

शास्त्री-I साहित्य

अभिज्ञान शाकुन्तलम्

Saathi

Date __/__/__

प्र० (1) - पद्यमिदम् व्याख्येयम् ?

अभिमुखे मयि संहृतमीक्षणं
हसितमन्यनिमित्तकृतोदयम् ।
विनयवारितवृत्तिरतस्तया
न विवृतो मदनो न च संवृतः ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदासप्रणीतस्य अभिज्ञानशाकुन्तलम् नाट्यकाव्यस्य द्वितीयोङ्कात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके शकुन्तलाया आत्मनि अनुरागविशेषं संभावयनं राजा विदूषकं कथयति—

व्याख्या - मयि अभिमुखे = संमुखं स्थिते सति, तस्या मुखकमलं पश्यति सति तया ईक्षितं = नेत्रविलोकनं वा संहृतं = निवर्तितं गोपितं, पराङ्मुखं कृतम् अभिमुखोऽहं तया गूढं वीक्षित इत्यर्थः, अन्यत् = इतरत् निमित्तं = हेतु यस्य तत् अन्यनिमित्तम् = अन्यहेतुकं यथा स्यात्तथा कृतः = विहितः उदयः = आविर्भावः यस्य तत् अन्यनिमित्तकृतोदयम् कथान्तरव्याजेन तया हसितं = हासः कृतः, विनयेन = शीलेन वारिता नियमिता वृत्तिः = व्यापारो यस्य स विनयवारितवृत्तिः = लज्जावरुद्धप्रसरः, मदनः = कामः मद्विषयकः प्रेमा तया = शकुन्तलया न विवृतः = न प्रकटीकृतः न च संवृतः = न च गोपायितः निगूहितः, मुग्धात्वेन दृष्टिपरावर्तनादिना निगूहितोऽपि मद्विषयको भावोऽन्यनिमित्तकथादिभिर्हसितादिभिर्वा स्वानुरागप्रकटनात् स्फुटीकृतः ।

Renu Devi
10/08/20

राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया ।

उपशास्त्री -I साहित्य - तृतीय - पत्रम्
रघुवंश महाकाव्यम्

Date ___/___/___

प्र० (1) पद्यमिदम् व्याख्येयम् ?
अमुं पुरः पश्यसि देवदारुं पुत्रीकृतोऽसौ वृषभध्वजेन ।
यो हेमकुम्भस्तननिःसृतानां स्कन्दस्य मातुः पयसां रसज्ञः ॥

उत्तरम् - प्रसंगः — प्रस्तुतोऽयं श्लोकः महाकवि कालिदासप्रणीतस्य रघुवंश महाकाव्यस्य द्वितीय सर्गात् उद्धृतोऽस्ति।
अस्मिन् श्लोके सिंहः राजा दिलीपंप्रत्युवाच - राजन! पुरः स्थितोऽसौ देवदारुः भगवतः शिवस्य पुत्रवत् प्रियोऽस्ति। स्वयं भगवती पार्वती कनककुम्भवत्स्वस्तननिर्गतेन पयसा स्कन्द इव स्तनसदृशेन कनकघटेन जलमासिच्य एनं पोषितवती।

व्याख्या :- पुरः = अग्रतः, अमुं = इमम्, देवदारुं = सुरद्रुमम्, पश्यसि = त्वमवलोकयसि किम्? अवश्यमेव त्वं पश्यसि। यः = देवदारुः स्कन्दस्य = कार्तिकेयस्य, मातुः = जनन्या पार्वत्याः, हेमकुम्भस्तननिःसृतानां = कनककलशरूपपयोधिनिर्गतानाम् यद्वा हेमकलशोपमगौरीस्तननिर्गतानाम्, पयसां = जलानाम् क्षीराणाञ्च, रसज्ञः = स्वादज्ञः, अनुभविता, असौ = देवदारुः वृषभध्वजेन = भगवता शिवेन, पुत्रीकृतः = स्वपुत्रत्वेनाङ्गीकृतः ।

Renu Devi
10/08/20
राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया

Page No.